# ॥ पाण्डवगीता ॥

पाण्डवा ऊचुः

प्रह्लाद-नारद-पराशर-पुण्डरीक-

व्यासाम्बरीष-शुक-शौनक-भीष्म-दाल्भ्यान् ।

रुक्माङ्गदाऽर्जुन-वसिष्ठ-विभीषणादीन्

पुण्यानिमान् परमभागवतान् स्मरामि ॥ १ ॥

लोमहर्षण उवाच

धर्मो विवर्धति युधिष्ठिरकीर्तनेन

पापं प्रणश्यति वृकोदरकीर्तनेन ।

शत्रुर्विनश्यति धनञ्जयकीर्तनेन

माद्रीसुतौ कथयतां न भवन्ति रोगाः ॥ २ ॥

ब्रह्मोवाच

ये मानवा विगतराग पराऽपरज्ञा

नारायणं सुरगुरुं सततं स्मरन्ति ।

ध्यानेन तेन हतकिल्बिषचेतनास्ते

मातुः पयोधररसं न पुनः पिबन्ति ॥ ३ ॥

इन्द्र उवाच

नारायणो नाम नरो नराणाम्
प्रसिद्धचोरः कथितः पृथिव्याम् ।
अनेकजन्मार्जितपापसञ्चयं
हरत्यशेषं स्मरतां सदैव ॥ ४ ॥

युधिष्ठिर उवाच

मेघश्यामं पीतकौशेयवासम्
श्रीवत्साङ्कं कौस्तुभोद्भासिताङ्गम् ।
पुण्योपेतं पुण्डरीकायताक्षम्
विष्णुं वन्दे सर्वलोकैकनाथम् ॥ ५ ॥

भीमसेन उवाच

जलौघमग्ना सचराऽचरा धरा
विषाणकोट्याऽखिलविश्वमूर्तिना ।
समुद्धृता येन वराहरूपिणा
स मे स्वयम्भूर्भगवान् प्रसीदतु ॥ ६ ॥

अर्जुन उवाच

अचिन्त्यमव्यक्तमनन्तमव्ययम्

विभुं प्रभुं भावितविश्वभावनम् ।

त्रैलोक्यविस्तारविचारकारकम्

हरिं प्रपन्नोऽस्मि गतिं महात्मनाम् ॥ ७ ॥

नकुल उवाच

यदि गमनमधस्तात्कालपाशानुबद्धो

यदि च कुलविहीने जायते पक्षिकीटे ।

कृमिशतमपि गत्वा जायते चान्तरात्मा

मम भवतु हृदिस्थे केशवे भक्तिरेका ॥ ८ ॥

सहदेव उवाच

तस्य यज्ञवराहस्य विष्णोरतुलतेजसः ।

प्रणामं ये प्रकुर्वन्ति तेषामपि नमो नमः ॥ ९ ॥

कुन्त्युवाच

स्वकर्मफलनिर्दिष्टां यां यां योनिं व्रजाम्यहम् ।

तस्यां तस्यां हृषीकेश त्वयि भक्तिर्दृढाऽस्तु मे ॥ १० ॥

माद्र्युवाच

कृष्णे रताः कृष्णमनुस्मरन्ति

रात्रौ च कृष्णं पुनरुत्थिता ये।
ते भिन्नदेहाः प्रविशन्ति कृष्णम्
हविर्यथा मन्त्रहुतं हुताशे ॥ ११ ॥

द्रौपद्युवाच
कीटेषु पक्षिषु मृगेषु सरीसृपेषु
रक्षःपिशाचमनुजेष्वपि यत्र यत्र।
जातस्य मे भवतु केशव त्वत्प्रसादात्
त्वय्येव भक्तिरचलाऽव्यभिचारिणी च ॥ १२ ॥

सुभद्रोवाच
एकोऽपि कृष्णस्य सकृत्प्रणामो
दशाश्वमेधावभृथेन तुल्यः।
दशाश्वमेधी पुनरेति जन्म
कृष्णप्रणामी न पुनर्भवाय ॥ १३ ॥

अभिमन्युरुवाच
गोविन्द गोविन्द हरे मुरारे
गोविन्द गोविन्द मुकुन्द कृष्ण
गोविन्द गोविन्द रथाङ्गपाणे।

गोविन्द गोविन्द नमो नमस्ते ॥ १४ ॥

धृष्टद्युम्न उवाच

श्रीराम नारायण वासुदेव

गोविन्द वैकुण्ठ मुकुन्द कृष्ण ।

श्रीकेशवानन्त नृसिंह विष्णो

मां त्राहि संसारभुजङ्गदष्टम् ॥ १५ ॥

सात्यकिरुवाच

अप्रमेय हरे विष्णो कृष्ण दामोदराऽच्युत ।

गोविन्दानन्त सर्वेश वासुदेव नमोऽस्तु ते ॥ १६ ॥

उद्धव उवाच

वासुदेवं परित्यज्य योऽन्यं देवमुपासते ।

तृषिता जाह्नवीतीरे कूपं वाञ्छन्ति दुर्भगाः ॥ १७ ॥

धौम्य उवाच

अपां समीपे शयनासनस्थिते

दिवा च रात्रौ च यथाधिगच्छता ।

यद्यस्तिकिञ्चित्सुकृतं कृतं मया

जनार्दनस्तेन कृतेन तुष्यतु ॥ १८ ॥

सञ्जय उवाच

आर्ता विषण्णाः शिथिलाश्च भीता

घोरेषु च व्याधिषु वर्तमानाः ।

संकीर्त्य नारायण-शब्दमात्रम्

विमुक्तदुःखाः सुखिनो भवन्ति ॥ १९ ॥

अक्रूर उवाच

अहं तु नारायणदासदास-

दासस्य दासस्य च दासदासः ।

अन्येभ्य ईशो जगतो नराणाम्

तस्मादहं धन्यतरोऽस्मि लोके ॥ २० ॥

विदुर उवाच

वासुदेवस्य ये भक्ताः शान्तास्तद्गतमानसाः ।

तेषां दासस्य दासोऽहं भवेज्जन्मनि जन्मनि ॥ २१ ॥

भीष्म उवाच

विपरीतेषु कालेषु परिक्षीणेषु बन्धुषु ।

त्राहि मां कृपया कृष्ण शरणागतवत्सल ॥ २२ ॥

द्रोणाचार्य उवाच

ये ये हताश्चक्रधरेण दैत्या-

स्त्रैलोक्यनाथेन जनार्दनेन ।

ते ते गता विष्णुपुरीं प्रयाताः

क्रोधोऽपि देवस्य वरेण तुल्यः ॥ २३ ॥

कृपाचार्य उवाच

मज्जन्मनः फलमिदं मधुकैटभारे

मत्प्रार्थनीयमदनुग्रह एष एव ।

त्वद्भृत्य-भृत्य-परिचारक-भृत्य-भृत्य-

भृत्यस्य भृत्य इति मां स्मर लोकनाथ ॥ २४ ॥

अश्वत्थामोवाच

गोविन्द केशव जनार्दन वासुदेव

विश्वेश विश्व मधुसूदन विश्वरूप ।

श्रीपद्मनाभ पुरुषोत्तम पुष्कराक्ष

नारायणाऽच्युत नृसिंह नमो नमस्ते ॥ २५ ॥

कर्ण उवाच

नान्यं वदामि न शृणोमि न चिन्तयामि

नान्यं स्मरामि न भजामि न चाश्रयामि ।

भक्त्या त्वदीय चरणाम्बुजमादरेण

श्रीश्रीनिवास पुरुषोत्तम देहि दास्यम् ॥ २६ ॥

धृतराष्ट्र उवाच

नमो नमः कारणवामनाय

नारायणायामितविक्रमाय ।

श्रीशार्ङ्गचक्रासिगदाधराय

नमोऽस्तु तस्मै पुरुषोत्तमाय ॥ २७ ॥

गान्धार्युवाच

त्वमेव माता च पिता त्वमेव

त्वमेव बन्धुश्च सखा त्वमेव ।

त्वमेव विद्या द्रविणं त्वमेव

त्वमेव सर्वं मम देव देव ॥ २८ ॥

द्रुपद उवाच

यज्ञेशाच्युत गोविन्द माधवानन्त केशव ।

कृष्ण विष्णो हृषीकेश वासुदेव नमोऽस्तु ते ॥ २९ ॥

जयद्रथ उवाच

नमः कृष्णाय देवाय ब्रह्मणेऽनन्तशक्तये ।

योगीश्वराय योगाय त्वामहं शरणं गतः ॥ ३० ॥

विकर्ण उवाच

कृष्णाय वासुदेवाय देवकीनन्दनाय च ।

नन्दगोपकुमाराय गोविन्दाय नमो नमः ॥ ३१ ॥

सोमदत्त उवाच

नमः परमकल्याण नमस्ते विश्वभावन ।

वासुदेवाय शान्ताय यदूनां पतये नमः ॥ ३२ ॥

विराट उवाच

नमो ब्रह्मण्यदेवाय गोब्राह्मणहिताय च ।

जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥ ३३ ॥

शल्य उवाच

अतसीपुष्पसङ्काशं पीतवाससमच्युतम् ।

ये नमस्यन्ति गोविन्दं न तेषां विद्यते भयम्॥ ३४॥

बलभद्र उवाच

कृष्ण कृष्ण कृपाळुस्त्वमगतीनां गतिर्भव।

संसारार्णवमग्नानां प्रसीद पुरुषोत्तम॥ ३५॥

श्रीकृष्ण उवाच

कृष्ण कृष्णेति कृष्णेति यो मां स्मरति नित्यशः।

जलं भित्वा यथा पद्मं नरकादुद्धराम्यहम्॥ ३६॥

नित्यं वदामि मनुजाः स्वयमूर्ध्वबाहुः

यो मां मुकुन्द नरसिंह जनार्दनेति।

जीवो जपत्यनुदिनं मरणे रणे वा

पाषाणकाष्ठसदृशाय ददाम्यभीष्टम्॥ ३७॥

ईश्वर उवाच

सकृन्नारायणेत्युक्त्वा पुमान् कल्पशतत्रयम्।

गङ्गादिसर्वतीर्थेषु स्नातो भवति पुत्रक॥ ३८॥

सूत उवाच

तत्रैव गङ्गा यमुना च वेणी

गोदावरी सिन्धु सरस्वती च ।
सर्वाणि तीर्थानि वसन्ति तत्र
यत्राच्युतोदारकथाप्रसङ्गः ॥ ३९ ॥

यम उवाच
नरके पच्यमानं तु यमेन परिभाषितम् ।
किं त्वया नार्चितो देवः केशवः क्लेशनाशनः ॥ ४० ॥

नारद उवाच
जन्मान्तरसहस्रेण तपोध्यानसमाधिना ।
नराणां क्षीणपापानां कृष्णभक्तिः प्रजायते ॥ ४१ ॥

प्रह्लाद उवाच
नाथ योनिसहस्रेषु येषु येषु व्रजाम्यहम् ।
तेषु तेष्वचला भक्तिरच्युताऽस्तु सदा त्वयि ॥ ४२ ॥
या प्रीतिरविवेकनां विषयेष्वनपायिनी ।
त्वामनुस्मरतः सा मे हृदयान्माऽपसर्पतु ॥ ४३ ॥

विश्वामित्र उवाच
किं तस्य दानैः किं तीर्थैः किं तपोभिः किमध्वरैः ।

यो नित्यं ध्यायते देवं नराणां मनसि स्थितम् ॥ ४४ ॥

जमदग्निरुवाच

नित्योत्सवः सदा तेषां नित्यश्रीर्नित्य मङ्गलम् ।

येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः ॥ ४५ ॥

भरद्वाज उवाच

लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ।

येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ४६ ॥

गौतम उवाच

गोकोटिदानं ग्रहणेषु काशी-

प्रयाग-गङ्गाऽयुतकल्पवासः ।

यज्ञायुतं मेरुसुवर्णदानम्

गोविन्दनाम्ना न कदापि तुल्यम् ॥ ४७ ॥

अत्रिरुवाच

गोविन्देति सदा स्नानं गोविन्देति सदा जपः ।

गोविन्देति सदा ध्यानं सदा गोविन्दकीर्तनम् ॥ ४८ ॥

अक्षरं हि परं ब्रह्म गोविन्देत्यक्षरत्रयम् ।

तस्मादुच्चारितं येन ब्रह्मभूयाय कल्पते ॥ ४९ ॥

श्रीशुक उवाच

अच्युतः कल्पवृक्षोऽसावनन्तः कामधेनु वै ।

चिन्तामणिस्तु गोविन्दो हरेर्नाम विचिन्तयेत् ॥ ५० ॥

हरिरुवाच

जयतु जयतु देवो देवकीनन्दनोऽयम्

जयतु जयतु कृष्णो वृष्णिवंशप्रदीपः ।

जयतु जयतु मेघश्यामलः कोमलाङ्गो

जयतु जयतु पृथ्वीभारनाशो मुकुन्दः ॥ ५१ ॥

पिप्पलायन उवाच

श्रीमन्नृसिंहविभवे गरुडध्वजाय

तापत्रयोपशमनाय भवौषधाय ॥

कृष्णाय वृश्चिकजलाग्निभुजङ्गरोग-

क्लेशव्ययाय हरये गुरवे नमस्ते ॥ ५२ ॥

आविर्होत्र उवाच

कृष्ण त्वदीयपदपङ्कजपञ्जरान्ते

अद्यैव मे विशतु मानसराजहंसः ।
प्राणप्रयाणसमये कफवातपित्तैः
कण्ठावरोधनविधौ स्मरणं कुतस्ते ॥ ५३ ॥

विदुर उवाच
हरेर्नामैव नामैव नामैव मम जीवनम् ।
कलौ नास्त्येव नास्त्येव नास्त्येव गतिरन्यथा ॥ ५४ ॥

वसिष्ठ उवाच
कृष्णेति मङ्गलं नाम यस्य वाचि प्रवर्तते ।
भस्मीभवन्ति तस्याशु महापातककोटयः ॥ ५५ ॥

अरुन्धत्युवाच
कृष्णाय वासुदेवाय हरये परमात्मने ।
प्रणतक्लेशनाशाय गोविन्दाय नमो नमः ॥ ५६ ॥

कश्यप उवाच
कृष्णानुस्मरणादेव पापसंघातपञ्जरः ।
शतधा भेदमाप्नोति गिरिर्वज्रहतो यथा ॥ ५७ ॥

दुर्योधन उवाच

जानामि धर्मं न च मे प्रवृत्तिः

जानामि पापं न च मे निवृत्तिः ।

केनापि देवेन हृदि स्थितेन

यथा नियुक्तोऽस्मि तथा करोमि ॥ ५८ ॥

यन्त्रस्य मम दोषेण क्षम्यतां मधुसूदन ।

अहं यन्त्रं भवान्यन्त्री मम दोषो न विद्यते ॥ ५९ ॥

भृगुरुवाच

नामैव तव गोविन्द कलौ त्वत्तः शताधिकम् ।

ददात्युच्चारणान्मुक्तिं विना ह्यष्टाङ्गयोगतः ॥ ६० ॥

लोमश उवाच

नमामि नारायण पादपङ्कजम्

करोमि नारायणपूजनं सदा ।

वदामि नारायण नाम निर्मलम्

स्मरामि नारायणतत्त्वमव्ययम् ॥ ६१ ॥

शौनक उवाच

स्मृत्वा सकलकल्याणभजनं यत्र जायते ।

पुरुषं तमजं नित्यं व्रजामि शरणं हरिम् ॥ ६२ ॥

गर्ग उवाच

नारायणेति मन्त्रोऽस्ति वागस्ति वशवर्तिनी ।

तथापि नरके घोरे पतन्तीत्येतदद्भुतम् ॥ ६३ ॥

दाल्भ्य उवाच

किं तस्य बहुभिर्मन्त्रैर्भक्तिर्यस्य जनार्दने ।

नमो नारायणायेति मन्त्रः सर्वार्थसाधाकः ॥ ६४ ॥

वैशम्पायन उवाच

यत्र योगीश्वरः कृष्णो यत्र पार्थो धनुर्धरः ।

तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ६५ ॥

अङ्गीरस उवाच

हरिर्हरति पापानि दुष्टचित्तैरपि स्मृतः ॥

अनिच्छयाऽपि संस्पृष्टो दहत्येव हि पावकः ॥ ६६ ॥

पराशर उवाच

सकृदुच्चरितं येन हरिरित्यक्षरद्वयम् ।

लब्धः परिकरस्तेन मोक्षाय गमनं प्रति ॥ ६७ ॥

पुलस्त्य उवाच

हे जिह्वे रससारज्ञे सर्वदा मधुरप्रिये ।

नारायणाख्यपीयूषं पिब जिह्वे निरन्तरम् ॥ ६८ ॥

व्यास उवाच

सत्यं सत्यं पुनः सत्यं भुजमुत्थाप्य चोच्यते ।

नास्ति वेदात्परं शास्त्रं न देवः केशवात्परः ॥ ६९ ॥

धन्वन्तरिरुवाच

अच्युतानन्त गोविन्द नामोच्चारणभेषजात् ।

नश्यन्ति सकला रोगाः सत्यं सत्यं वदाम्यहम् ॥ ७० ॥

मार्कण्डेय उवाच

सा हानिस्तन्महाच्छिद्रं सा चान्धजडमूकता ।

यन्मुहूर्तं क्षणं वापि वासुदेवं न चिन्तयेत् ॥ ७१ ॥

अगस्त्य उवाच

निमिषं निमिषार्धं वा प्राणिनां विष्णुचिन्तनम् ।

क्रतुकोटिसहस्राणां ध्यानमेकं विशिष्यते ॥ ७२ ॥

वामदेव उवाच

मनसा कर्मणा वाचा ये स्मरन्ति जनार्दनम् ।

तत्र तत्र कुरुक्षेत्रं प्रयागो नैमिषं वनम् ॥ ७३ ॥

शुक उवाच

आलोड्य सर्वशास्त्राणि विचार्यैवं पुनः पुनः ।

इदमेकं सुनिष्पन्नं ध्येयो नारायणः सदा ॥ ७४ ॥

श्रीमहादेव उवाच

शरीरे जर्झरीभूते व्याधिग्रस्ते कलेवरे ।

औषधं जाह्नवीतोयं वैद्यो नारायणो हरिः ॥ ७५ ॥

शौनक उवाच

भोजनाच्छादने चिन्तां वृथा कुर्वन्ति वैष्णवाः ।

योऽसौ विश्वम्भरो देवः स भक्तान् किमुपेक्षते ॥ ७६ ॥

सनत्कुमार उवाच

यस्य हस्ते गदा चक्रं गरुडो यस्य वाहनम् ॥

शङ्खः करतले यस्य स मे विष्णुः प्रसीदतु ॥ ७७ ॥

शाण्डिल्य उवाच

जले रक्षतु वाराहः स्थले रक्षतु वामनः ।

अटव्यां नारसिंहश्च सर्वतः पातु केशवः ॥ ७८ ॥

कृतवर्मोवाच

शंखचक्रगदापाणे द्वारकानिलयाच्युत ।

गोविन्द पुण्डरीकाक्ष रक्ष मां शरणागतम् ॥ ७९ ॥

पवन उवाच

गोविन्देति परं ब्रह्म गोविन्देति च त्र्यक्षरम् ।

सकृदुच्चारितं येन विष्णोस्सायुज्यमानुयात् ॥ ८० ॥

नैर्ऋत उवाच

यद्दिनं हरिसल्लापकथापीयूषवर्जितम् ।

तद्दिनं दुर्दिनं मन्ये मेघच्छन्नं न दुर्दिनम् ॥ ८१ ॥

विनायक उवाच

नारायणेति मन्त्रेण चतुरक्षरशालिना ।

यन्मनो विलयं याति तस्य विष्णोः परं पदम् ॥ ८२ ॥

भास्कर उवाच

ध्येयः सदा सवितृमण्डलमध्यवर्ती

नारायणः सरसिजासनसन्निविष्टः ।

केयूरवान् मकरकुण्डलवान् किरीटी

हारी हिरण्मयवपुर्धृतशंखचक्रः ॥ ८३ ॥

वालिखिल्य उवाच

इदं शरीरं शतसन्धिजर्झरम्

पतत्यवश्यं परिणामदुर्लभम् ।

किमौषधं पश्यसि मूढ दुर्मते

निरामयं कृष्णरसायनं पिब ॥ ८४ ॥

सनत्कुमार उवाच

नास्ति नास्ति महाभाग कलिकालसमं युगम् ।

स्मरणात्कीर्तनादेव प्राप्नोति परमां गतिम् ॥ ८५ ॥

कण्व उवाच

हृदि रूपं मुखे चिह्नं नैवेद्यमुदरे तथा ।

तुलसीपादतीर्थं च मस्तके यस्य सोऽस्म्यहम् ॥ ८६ ॥

भार्गव उवाच

तदेव लग्नं सुदिनं तदेव

ताराबलं चन्द्रबलं तदेव ।

विद्याबलं दैवबलं तदेव

लक्ष्मीपते तेऽंघ्रियुग्मं स्मरामि ॥ ८७ ॥

परीक्षिदुवाच

नमोऽस्मदाचार्य परम्पराभ्यो

नमो नमो भागवत प्रजाभ्यः ।

नमो नमोऽनन्तमुखामरेभ्यो

नमः श्रियै श्रीपतये नमोऽस्तु ॥ ८८ ॥

एवं ब्रह्मादयो देवा ऋषयश्च तपोधनाः ।

कीर्तयन्ति सुरश्रेष्ठमेवं नारायणं विभुम् ॥ ८९ ॥

इदं पवित्रमायुष्यं पुण्यं पापप्रणाशनम् ।

धर्मार्थकाममोक्षार्थं पाण्डवैः परिकीर्तितम् ॥ ९० ॥

यः पठेत्प्रातरुत्थाय शुचिस्तद्गतमानसः ।

गवां शतसहस्रस्य सम्यग्दत्तस्य यत्फलम् ॥ ९१ ॥

तत्फलं समवाप्नोति यः पठेदिति संस्तवम् ।

सर्वपापविनिर्मुक्तो विष्णुसायुज्यमाप्नुयात् ॥ ९२ ।

गीता गङ्गा च गायत्री गोविन्दो यस्य चेतसि ।

चतुर्गकारसंयुक्ते पुनर्जन्म न विद्यते ॥ ९३ ॥

गीतां यः पठते नित्यं श्लोकार्धं श्लोकमेव वा ।

मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ॥ ९४ ॥

आकाशात्पतितं तोयं यथा गच्छति सागरम् ।

सर्वदेवनमस्कारः केशवं प्रतिगच्छति ॥ ९५ ॥

॥ इति पाण्डवगीता ॥